NJESR/January2023/Volume5/Issue1 E-ISSN-2582-5836

DOI-10.53571/NJESR.2023.5.1.48-50

# पुराणेषु उत्कलः

डॉ.आदित्यनारायणदाशः, संस्कृतविभागः, अध्यापकः,

केन्द्रीयविश्वविद्यालयः, ओडिशा

(Received:25December2022/Revised:31December2022/Accepted:15January2023/Published:21January2023)

उत्कलः = उत्-कल-अच्। उत्कृष्टा कला यत्र सः उत्कलः इति विग्रहेण उत्कलशब्दः उत्कृष्टकलापूर्णस्य देशविशेषस्य वाचकः। श्रीमद्भागवते वर्णितस्य सूर्यवंशस्य विवरणानुसारं मनुपूत्रस्य सुद्युम्नस्य उत्कलः, गयः विमलश्चेति त्रयः पुत्राः आसन्। ते दक्षिणापथराजानः बभूवुः इति तत्रत्यं वचनम्। यथा -

तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः दक्षिणापथराजानो बभूवु धर्मवत्सलाः।।[1]

ओडिआ पुर्ण्णचन्द्रभाषाकोषानुसारं ख्री.पू.षष्ठशताब्द्यां उत्कलदेश ओड्रदेशो वा विद्यमानः आसीत्। तत्रैव साम्प्रतिकवङ्गप्रदेशः, ओडिशाप्रदेशः, मध्यप्रदेशविहारप्रदेशयोः अन्तर्वर्ती ओडिआभाषी देशः उत्कलत्वेन प्रसिद्धः आसीत्।[2]

स्कन्दपूराणे एकः अध्यायः सम्पूर्णतया उत्कलदेशस्य महात्म्यं प्रस्तौति। तत्र पुरुषोत्तमक्षेत्रं कस्मिन् देशे वर्तते, तत्र नारायणः साक्षात् दारुरूपेण प्रकाशते इति ऋषीणां प्रश्नं श्रुत्वा जैमीनिः उत्कलदेशस्य विवरणं प्रददाति। यथा -

उत्कलो नाम देशोऽस्ति ख्यातः परमपावनः।

यत्र तीर्थान्यनेकानि पुण्यान्यायतनानि च।।

दक्षिणस्योदधेस्तीरे स तु देशः प्रतिष्ठितः।।[3]

उत्कलदेशे वर्तमाना सर्वेऽपि पुरुषाः यथा विद्वांसः तथैव सदाचारपरायणाः विनिताः सत्यवादिनः वैष्णवाश्च। यथा- यत्र स्थिता वै पुरुषाः सदाचारनिदर्शनाः।। वृत्ताध्ययनसम्पन्ना यज्वानो यत्र भूसुराः।

सृष्ट्यादौ क्रतवो वेदा वेदशास्त्रप्रवर्त्तकाः। अष्टादशानां विद्यानां निधानं सम्प्रकीर्त्तितम्।।

गृहे गृहे निवसति लक्ष्मीर्नारायणाज्ञया। लज्जाशीला विनीताश्च आधिव्याधिविवर्जिताः।।

पितृमातृरताः सत्यवादिनो वैष्णवा जनाः ।। न चात्र वैष्णवः कश्चिन्नास्तिको वाऽपि वर्त्तते।।

सर्वे परहितास्तत्र न लुब्धा न शठाः खलाः ।।[4]

देशेऽस्मिन् स्त्रियः पतिव्रताः सुशीलाः रूपयौवनसम्पर्न्नाश्चेति जैनिनिः ब्रवीति -

दीर्घायुषस्तत्र जनाः स्त्रियश्च पतिदेवताः। सुशीला धर्मशीलाश्च तपाचारित्रभूषिताः।।

रूपयौवनगर्वाढ्याः सर्वालङ्कारभूषिताः। कुलशीलवयोवृत्तानुरूपचारचञ्चवः।।[5]

देशेऽस्मिन् ब्रह्मणाः क्षत्रियाः वैश्याः शूद्रश्च स्वकर्मनिरताः उदाराः प्रवर्तन्ते -

स्वकर्मनिरतास्तत्र प्रजारक्षणदीक्षिताः। क्षत्रिया दानशौण्ढश्च शस्त्रशास्त्रविशारदाः।।

यजन्ते क्रतुभिः सर्वे सततं भूरिदक्षिणैः। दीप्यन्ते चित्तयो येषां युपाः काञ्चनभूषिताः।।

येषां गृहेष्वतिथयः कामनाऽधिकपूजिताः। वैश्याश्च कृषिवाणिज्यगोरक्षावृत्तिसंस्थिताः।।

देवान् गुरून् भक्त्या प्रीणयन्ति धनैरापि। एकस्य द्वारि यातोऽर्थी न गच्छेदन्यवेश्मनि।।

गीतकाव्यकलाशिल्पकुशलताः प्रियवादिनः। शूद्राश्च धार्मिकास्तत्र स्नानदानक्रियारताः।।

कर्मणा मनसा वाचा धनैश्च द्विजसेवकाः। येऽन्ये सङ्करजातास्ते स्वे स्वे धर्मे प्रतिष्ठिताः।।[6]

उत्कले पजर्न्यः यथाकालं प्रवर्षति तत्र दुर्भिक्षादयः दैवविपर्ययाः नावलोक्यन्ते। उत्कलस्य भूमिः सर्वगुणयुक्ता नानाद्रुमलताभूषिता सुमनोहरा वर्तते। यथा -

नविपर्यन्ति ऋतवो नाकाले वर्षति घनः। न शस्यहानिर्न मारुत् क्षुन्न पीडयति प्रजाः।।[7]

पुनः एवं सर्वगुणैर्युक्तो नानाद्रुमलताकुलः। अर्ज्जुनाशोकपुन्नागतालहिन्तालशालकैः।।[8]

उत्कलः नारीकेल-देवदारु-खदिर-विल्व-पनस-कपुत्थ-चम्पक-कर्ण्णिकाररैः विविधैः फलपुष्पैः शुशोभिताः अस्ति। यथा -

प्राचिनामलकैर्लोध्रैर्वकुलैर्नागकेशरैः। नारिकेलैः पियालैश्च सरलैर्देवदारुभिः।।

धवैश्च खदिरैर्विल्वैः पनसैश्च कपुत्थकैः। चम्पकैः कर्ण्णिकारैश्च कोविदारैः सपाटलैः।।

कदम्वनिम्वनिचुलरसालामलकैस्तथा। नागरङ्गैश्च जम्वीरैर्नीपकैर्मातुलुङ्गकैः।।

मन्द्रारैः परिजातैश्च न्यग्रोधागुरुचन्दनैः। खर्जुराम्रातकैः सिद्धैर्मुचुकुन्दैः सकिंशुकैः।।

तिन्दुकैः सप्तपर्ण्णैश्च अश्वत्थैश्च विभीतकैः। अन्यश्च विविधैर्वृक्षैः प्रकीर्ण्ण सुमनोहरैः।।[9]

अतः विविधपुण्यायतनाविशिष्टः उत्कलदेशः भूस्वर्गः इति तत्रैवान्ते सिद्धान्तितं वर्तते। वामदेवसंहितायामपि उत्कलदेशस्य महत्त्वं स्कन्दपुराणानुरूपं वर्णितमस्ति। उत्कलदेशः पृथिव्याः मण्डनरूपः सन् भारतवर्षे विराजते इति तत्रत्यं वचनम्। यथा -

यश्चायं भारते वर्षे उत्कलाख्यः कुमण्डनः। तद्देशे ये जनाः सन्ति लज्जाशीला विनीतकाः।।[10]

ब्रह्मपुराणेऽपि उत्कलदेशः तत्र नीवसतां जनानां च माहात्म्यं प्रकिर्तितं यथा -

पुत्रदारधनैरुक्ता दातारः सत्यवादिनः। निवसन्त्युत्कले पुण्णे यज्ञोत्सव विभूषिते।।[11]

अन्यत्र च-

आस्ते तत्र मुनिश्रेष्ठो विख्यातः पुरुषोत्तमः। यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्तिता।।[12]

श्रीक्षेत्रस्य अपरं नाम पुरुषोत्तमक्षेत्रम्, शङ्खक्षेत्रम्, नीलाचलः, श्रीजगन्नाथक्षेत्रम्, जगन्नाथपुरी इति। यत्तु महोदधेः उपकुलेऽवस्थितम्। क्षेत्रेऽस्मिन् ग्रीष्मवर्षाशीतानुभवः समानरूपेण परिदृश्यते। तदेव श्रीक्षेत्रं स्ववक्षसि धारयन् उत्कलदेशः सर्वदेशवरिष्ठः वर्तते इत्यत्र नास्ति कश्चन संशयलेशः। तदुक्तमन्यत्र -

पुरुषोत्तमात् परं क्षेत्रं नास्त्येव पृथिवीतले। भू-स्वर्गमिति विख्यातं देवानामपि दुर्ल्लभम्।।[13]

उत्कलस्य अपरः नाम ओड्रदेशः इति शाश्त्रान्तरेषु परिदृश्यते। ओड्रदेशश्य आधुनिकं नाम ओडिशा इति। देशोऽयं लवणसमुद्रस्य(वङ्गोपसागरस्य) उत्तरतीरे विद्यते। अत्र अनेकानि प्रशिद्धानि तीर्थक्षेत्राणि सन्ति। श्रीपुरुषोत्तमक्षेत्रं देशेऽस्मिन् विद्यते। अस्मिन् क्षेत्रे नीलमाधवः दारुरूपजगन्नाथरूपेण विराजते। स्कन्दपुराणे अयं देशः यथा उत्कलसंज्ञया व्यवहृतः तथैव ओड्रनाम्नाऽपि परिचितः यथा -

राजन्ननेकतीर्थानि व्यचारिषमहं प्रभो। आशैशवान् क्षितितले श्रुतान्यन्यैस्तु यानि वै।।

ओड्रदेश इति ख्यातो वर्षे भारतसंज्ञके। दक्षिणस्योदधेस्तीरे क्षेत्रं श्रीपुरुषोत्तमम्।।[14]

ब्रह्मपुराणेऽपि उत्कलदेशः ओड्रदेशनाम्ना समाख्यातः। समुद्रादुत्तरं विरजामण्डलं यावत् देशः पुण्यशीलानां सर्वैः गुणैः अलङ्कृतानां ब्रह्मणानां देशः इत्युक्तः। यथा -

तत्रास्ते भारते वर्षे दक्षिणोदधिसिंस्थतः। ओड्रदेश इति ख्यातः सर्गमोक्षप्रदाकः।।

समुद्रादुत्तरं तावद्यावद्विरजमण्डलम्। देशोऽसौ पुण्यशीलानां गुणैः सर्वैरलङ्कतः।।

तत्र देशप्रसूता ये ब्राह्मणाः संयतेन्द्रियाः। तपः स्वाध्यायनिरता वन्द्याः पुज्याश्च ते सदा।।

श्राद्धे दाने विवाहे च यज्ञे वाचर्यकर्म्मणि। प्रशस्ताः सर्वकाय्येषु तत्र देशोद्भवाद्विजाः।।

षट्कर्म्मनिरतास्तत्र ब्राह्मणा वेदपारगाः। इतिहासविदश्चैव पुराणार्थविशारदाः।।[15]

**<u>पादटिप्पणि</u>**

1.श्रीमद्भा- 9/1/41

2.पूर्णचन्द्रओडिआ भाषाकोषः प्रथमभागः पृ.सं.940

3.पु.मा.6/1-3

4.पु.मा.6/3-7

5. पु.मा.6/7-9

6.पु.मा.6/10-14

7.पु.मा.6/15

8.पु.मा.6/18

9.पु.मा.6/19-23

10.वा.सं. 1/28

11.ब्रह्म.पु.28/7

12.ब्रह्म.पु.28/35

13.ब्रह्मपुराणम्

14.पु.मा.7/22-23

15.ब्रह्म.पु.28/1-5